# नागस्य भक्तिः

कश्चन ग्रामः अस्ति। ग्रामे एकः नागः अस्ति। सः अतीव विशालः विषपूर्णः च। तस्य स्वभावः अपि दुष्टः। सः शीश्शब्दं कृत्वा केवलं सर्वम् उत्पीडयति। सर्वे जनाः तस्मात् त्रस्यन्ति।

एकदा नारदमुनिः ततः गच्छन् भवति। सः नागं पश्यति। नागः नारदमुनिं दृष्ट्वा अपि शीश्शब्दं करोति। नारदः कृपालुः। सः नागाय भक्तिज्ञानं ददाति। ततः परं नागः सर्वदा हरिनामजपं करोति। स्वस्य दुष्ट-स्वभावं परित्यजति। कमपि न उत्पीडयति। शीश्शब्दम् अपि न करोति।

तत् दृष्टवा जनाः निर्भीकाः जाताः। नागात् इतोऽपि न त्रस्यन्ति। तस्य समीपं गन्तुं भयम् अपि न अनुभवन्ति। अपितु इदानीं ते जनाः नागम् उत्पीडयन्ति। तस्य उपरि पाषाणखण्डं क्षिपन्ति। दण्डेन अपि ताडयन्ति। नागः दुःखितः भवति। सः नारदं स्मरति। नारदः प्रत्यक्षः भवति। नागः सर्वं निवेदयति।

नारदमुनिः सर्वं श्रुत्वा वदति "यथैव जनाः भवन्तं पीडयितुम् आगच्छन्ति, तथैव भवान् शिरम् उत्थापयतु अथ च आक्रमणं करोति इव फणां दर्शयतु" इति।

अभिप्रायः
कदाचित् नास्तिकाः उत्पीडयन्ति चेत् भक्तजनैः प्रतिकारः न करणीयः। किन्तु कृष्णस्य मन्दिरं, तस्य भक्ताः तु रक्षणीयाः एव।

-श्रीलप्रभुपादः

शब्दमञ्जूषा
शीश्शब्दः = hissing sound, उत्पीडयति = to harass, त्रस्यन्ति = scared, फणा = hood.